।। अथ **सटीके** ।।

न्यायभाष्ये चतुर्थाध्यायस्य प्रथममाह्निद्धठुड़१४;नकम् ।।

* * * *

न्या. सू. ।। ४ ।। १ ।। १ ।। मनसोऽनन्तरं प्रवृत्तिः परीक्षितव्या, तत्र खलु यावद् धर्माधर्माश्रयशरीरादि परीक्षितं सर्वा सा प्रवृत्तेः परीक्षेत्याह--- **प्रवृत्तिर्यथोक्ता ।। १ ।। तथा परीक्षितेति ।। १ ।। प्रवृत्त्यनन्तरास्तर्हि दोषाः परीक्ष्यन्तामित्यत आह--- न्या. सू. ।। ४ ।। १ ।। २ ।।** तथा दोषाः ।। २ ।। परीक्षिता इति, बुद्धिसमानाश्रयत्वादात्मगुणाः. प्रवृत्तिहेतुत्वात् पुनर्भवप्रतिसंधानसामर्थ्याच्च संसारहेतवः. संसारस्याऽनादित्वादनादिना प्रबन्धेन प्रवर्तन्ते। मिथ्याज्ञाननिवृत्तिस्तत्त्वज्ञानात् तन्निवृत्तौ रागद्वेषप्रबन्धोच्छेदेऽपवर्ग इति। प्रादुर्भावतिरोधानधर्मका इत्येवमाद्युक्तं दोषाणामिति ।। २ ।। न्या. सू. ।। ४ ।। १ ।। ३ ।। "प्रवर्तनालक्षणा दोषाः १-१-१८" इत्युक्तं तथा चेमे मानेर्ष्याऽसूयाविचिकित्सामत्सरादयः ते कस्मान्नोपसंख्यायन्ते ? इत्यत आह--- **तत्रैराश्यम्-- रागद्वेषमोहार्थान्तरभावात् ।। ३ ।। तेषां दोषाणां त्रयो राशयः= त्रयः पक्षाः-- रागपक्षः-- कामो मत्सरः स्पृहा तृष्णा लोभ इति. द्वेषपक्षः-- क्रोध ईर्ष्याऽसूया द्रोहोऽमर्ष इति, मोहपक्षः-- मिथ्याज्ञानं विचिकित्सा मानः प्रमाद इति. त्रैराश्यान्नोपसंख्यायन्ते इति। लक्षणस्य तर्ह्यऽभेदात् त्रित्वमनुपपन्नम् ?. नानुपपन्नम्-- रागद्वेषमोहार्थान्तरभावात्= आसक्तिलक्षणो रागः. अमर्षलक्षणो द्वेषः. मिथ्याप्रतिपत्तिलक्षणो मोह इति, एतत् प्रतयात्मवेदनीयं सर्वशरीरिणाम्= विजानात्ययं शरीरी रागमुत्पन्नम्-- 'अस्ति मे।ऽध्यात्मं रागधर्मः' इति, विरागं च विजानाति-- 'नास्ति मेऽध्यात्मं रागधर्मः' इति. एवमितरयोरपीति। मानेर्ष्यासूयाप्रभृतयस्तु त्रैराश्यमनुपतिता इति नोपसंख्यायन्ते ।। ३ ।। न्या. सू. ।। ४ ।। १ ।। ४ ।।** न-- एकप्रत्यनीकभावात् ।। ४ ।। नाऽर्थान्तरं रागादयः, कस्मात् ?, एकप्रत्यनीकभावात्= तत्त्वज्ञानम्= सम्यङ्मतिः= आर्यप्रज्ञा= संबोध इत्येममिदं प्रत्यनीकं त्रयाणामिति ।। ४ ।। न्या. सू. ।। ४ ।। १ ।। ५ ।। **व्यभिचारादहेतुः ।। ५ ।। एकप्रत्यनीकाः पृथिव्यां श्यामादयोऽग्निसंयोगेनैकेन. एकयोनयश्च पाकजा इति ।। ५ ।। न्या. सू. ।। ४ ।। १ ।। ६ ।। सति चार्थान्तरभावे---** तेषां मोहः पापीयान्-- नामूढस्येतरोत्पत्तेः ।। ६ ।। मोहः पापः पापतरो वा द्वावभिप्रेत्योक्तम्, कस्मात् ?. नाऽमूढस्येतरोत्पत्तेः= अमूढस्य रागद्वेषौ नोत्पद्येते, मूढस्य तु यथासंकल्पमुत्पत्तिः= विषयेषु रञ्जनीयाः संकल्पा रागहेतवः कोपनीयाः संकल्पा द्वेषहेतवः उभये च संकल्पा न मिथ्याप्रतिपत्तिलक्षणत्वाद् मोहादन्ये, ताविमौ मोहयोनी रागद्वेषाविति, तत्त्वज्ञानाच्च मोहनिवृत्तौ रागद्वेषानुत्पत्तिरित्येकप्रत्यनीकभावोपपत्तिः, एवं च कृत्वा तत्त्वज्ञानात् "दुःखजन्मप्रवृत्तिदोषमित्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः १-१-२" इति व्याख्यातमिति ।। ६ ।।न्या. सू. ।। ४ ।। १ ।। ७ ।। प्राप्तस्तर्हि--- **निमित्तनैमित्तकभावादर्थान्तरभावो दोषेभ्यः ।। ७ ।। अन्यद्धि निमित्तमऽन्यच्च नैमित्तकमिति दोषनिमित्तत्वाददोषो मोह इति ।। ७ ।। न्या. सू. ।। ४ ।। १ ।। ८ ।।** न-- दोषलक्षणावरोधान्मोहस्य ।। ८ ।। "प्रवर्तनालक्षणा दोषः १-१-१८" इत्यनेन दोषलक्षणेनावरुध्यते दोषेषु मोह इति ।। ८ ।। न्या. सू. ।। ४ ।। १ ।। ९ ।। **निमित्तनैमित्तकोपपत्तेश्च तुल्यजातीयानामप्रतिषेधः ।। ९ ।। द्रव्याणां गुणानां वाऽनेकविधविकल्पो निमित्तनैमित्तकभावो तुल्यजातीयानां दृष्ट इति ।। ९ ।। न्या. सू. ।। ४ ।। १ ।। १० ।। दोषानन्तरं प्रेत्यभावः, तस्याऽसिद्धिः-- आत्मनो नित्यत्वात्= न खलु नित्यं किंचित् जायते म्रियते वा इति. जन्ममरणयोर्नित्यत्वादात्मनोऽनुपपत्तिः उभयं च प्रेत्यभाव इति । तत्रायं सिद्धानुवादः---** आत्मनित्यत्वे प्रेत्यभावसिद्धिः ।। १० ।। नित्योयमात्मा प्रैति= पूर्वशरीरं जहाति= म्रियते इति. प्रेत्य च= पूर्वशरीरं हित्वा भवति= जायते= शरीरान्तरमुपादत्ते इति. तच्चैतदुभयम्= पुनरुत्पत्तिः प्रेत्यभाव इति. तच्चैतत् नित्यत्वे संभवतीति। यस्य तु

सत्त्वोत्पादः सत्त्वनिरोधः प्रेत्यभावस्तस्य कृतहानमकृताभ्यागमश्च दोषः, उच्छेदहेतुवादे ऋष्युपदेशाश्चानर्थका इति ।। १० ।। न्या. सू. ।। ४ ।। १ ।। ११ ।। कथमुत्पत्तिरितिचेत् ?. **व्यक्ताद् व्यक्तानाम्-- प्रत्यक्षप्रामाण्यात् ।। ११ ।। केन प्रकारेण किंधर्मकात् कारणाद् व्यक्तं शरीरमुत्पद्यते इति ?, व्यक्तात्= भूतसमाख्यातात् पृथिव्यादितः परमसूक्ष्माद् नित्यात् व्यक्तम्= शरीरेन्द्रियविषयोपकरणाधारं प्रज्ञातं द्रव्यमुत्पद्यते, व्यक्तं च खल्विन्द्रियग्राह्यं तत्सामान्यात् कारणमपि व्यक्तम्। किं सामान्यम् ?. रूपादिगुणयोगः= रूपादिगुणयुक्तेभ्यः पृथिव्यादिभ्यो नित्येभ्यो रूपादिगुणयुक्तं शरीरादि उत्पद्यते-- प्रत्यक्षप्रामाण्यात्= दृष्टो हि रूपादिगुणयुक्तेभ्यो मृत्प्रभृतिभ्यस्तथाभूतस्य द्रव्यस्योत्पादः तेन चाऽदृष्टस्यानुमानमिति= रूपादीनामन्वयदर्शनात् प्रकृतिविकारयोः पृथिव्यादीनां नित्यानामतीन्द्रियाणां कारणभावोऽनुमीयते इति ।। ११ ।। न्या. सू. ।। ४ ।। १ ।। १२ ।।** न-- घटाद् घटानिष्पत्तेः ।। १२ ।। इदमपि प्रत्यक्षम्-- न खलु व्यक्ताद् घटाद् व्यक्तो घट उत्पद्यमानो दृश्यते इति. व्यक्ताद् व्यक्तस्यानुत्पत्तिदर्शनान्न व्यक्तं कारणमिति ।। १२ ।। न्या. सू. ।। ४ ।। १ ।। १३ ।। **व्यक्ताद् घटनिष्पत्तेरप्रतिषेधः ।। १३ ।। न ब्रूमः सर्वं सर्वस्य कारणमिति किं तु यदुत्पद्यते व्यक्तं द्रव्यं तत् तथाभूतादेवोत्पद्यते इति, व्यक्तं च तद् मृद्द्रव्यं कपालसंज्ञकं यतो घट उत्पद्यते न चैतद् निढद्धठुड़१४;नुवानः क्वचिदभ्यनुज्ञां लब्धुमर्हतीति। तदेतत् तत्त्वम् ।। १३ ।। न्या. सू. ।। ४ ।। १ ।। १४ ।। अतः परं प्रावादुकानां दृष्टयः प्रदर्श्यन्ते---** अभावाद् भावोत्पत्तिः-- नाऽनुपमृद्य प्रादुर्भावात् ।। १४ ।। असतः सदुत्पद्यते इत्ययं पक्षः, कस्मात् ?, उपमृद्य प्रादुर्भावात्= उपमृद्य बीजमङ्कुर उत्पद्यते नाऽनुपमृद्य, न चेद् बीजोपमर्दोऽङ्कुरकारणम् ? अनुपमर्देपि बीजस्याऽङ्कुरोत्पत्तिः स्यादिति ।। १४ ।। न्या. सू. ।। ४ ।। १ ।। १५ ।। अत्राभिधीयते--- **व्याघातादप्रयोगः ।। १५ ।। 'उपमृद्य प्रादुर्भावात्' इत्यऽयुक्तः प्रयोगः-- व्याघातात्= यदुपमृद्नाति न तदुपमृद्य प्रादुर्भवितुमर्हति-- विद्यमानत्वात्. यच्च प्रादुर्भवति न तेनाऽप्रादुर्भूतेन= अविद्यमानेनोपमर्द इति ।। १५ ।। न्या. सू. ।। ४ ।। १ ।। १६ ।।** न-- अतीतानागतयोः कारकशब्दप्रयोगात् ।। १६ ।। अतीति चाऽनागते चाविद्यमाने कारकशब्दः प्रयुज्यन्ते-- पुत्रो जनिष्यते जनिष्यमाणं पुत्रमभिनन्दति, पुत्रस्य जनिष्यमाणस्य नाम करोति, अभूत् कुम्भो भिन्नं कुम्भमनुशोचति-- भिन्नस्य कुम्भस्य कपालानि, अजाताः पुत्राः पितरं तापयन्ति इति बहुलं भाक्ताः प्रयोगा दृश्यन्ते। का पुनरियं भक्तिः ?. आनन्तर्य भक्तिः= आनन्तर्यसामर्थ्यादुपमृद्य प्रादुर्भावार्थः= प्रादुर्भविष्यन्नङ्कुर उपमृद्गातीति भाक्तं कर्तृत्वमिति ।। १६ ।। न्या. सू. ।। ४ ।। १ ।। १७ ।। **न-- विनष्टेभ्योऽनिष्पत्तेः ।। १७ ।। न विनष्टाद् बीजादङ्कुर उत्पद्यते इति तस्मान्नाऽभावाद् भावोत्पत्तिरिति ।। १७ ।। न्या. सू. ।। ४ ।। १ ।। १८ ।।** क्रमनिर्देशादप्रतिषेधः ।। १८ ।। उषमर्दप्रादुर्भावयोः पौर्वापर्यनियमः क्रमः स खल्वभावाद् भावोत्पत्तेर्हेतुर्निर्दिश्यते स च न प्रतिषिध्यते इति ।। न्या. सू. ।। ४ ।। १ ।। १९ ।। व्याहतव्यूहानामवयवानां पूर्वव्यूहनिवृत्तौ व्यूहान्तराद् द्रव्यनिष्पत्तिर्नाऽभावात्= बीजावयवाः कुतश्चिन्निमित्तात् प्रादुर्भूताक्रियाः पूर्वव्यूहं जहति व्यूहान्तरं चापद्यन्ते व्यूहान्तरादङ्कुर उत्पद्यते-- दृश्यन्ते खलु अवयवास्तत्संयोगाश्चाङ्कुरोत्पत्तिहेतवः, न चानिवृत्ते पूर्वव्यूहे बीजावयवानां शक्यं व्यूहान्तरेण भवितुमिति उपमर्दप्रादुर्भावयोः पौर्वापर्यनियमः क्रमः तस्मान्नाऽभावाद् भावोत्पत्तिरिति, न चान्यद् बीजावयवेभ्योऽङ्कुरोत्पत्तिकारणमित्युपपद्यते बीजोपादाननियम इति ।। १८ ।। न्या. सू. ।। ४ ।। १ ।। १९ ।। अथाऽपर आह--- **ईश्वरः कारणम्-- पुरुषकर्माऽऽफल्यदर्शनात् ।। १९ ।। पुरुषोयं समीहमानो नावश्यं समीहाफलं प्राप्नोति तेनानुमीयते-- पराधीनां पुरुषस्य कर्मफलाराधनमिति. यदधीनं स ईश्वरः तस्मादीश्वरः कारणमिति ।। १९ ।। न्या. सू. ।। ४ ।। १ ।। २० ।।** न-- पुरुषकर्माभावे फलानिष्पत्तेः ।। २० ।। ईश्वराधीना चेत् फलनिष्पत्तिः स्याद् अपि तर्हि पुरुषस्य समीहामन्तरेण फलं निष्पद्येतेति ।। २० ।। न्या. सू. ।। ४ ।। १ ।। २१ ।। **तत्कारितत्वादहेतुः ।। २१ ।। पुरुषकारमीश्वरोऽनुगृढद्धठुड़१४;णाति= फलाय पुरुषस्य यतमानस्येश्वरः फलं संपादयतीति. यदा न संपादयति तदा पुरुषकर्माऽफलं भवतीति. तस्मादीश्वरकारितत्वादऽहेतुः-- "पुरुषकर्माभावे**

फलानिष्पत्तेः" इति। गुणविशिष्टमात्मान्तरमीश्वरः तस्याऽऽत्मकल्पात् कल्पान्तरानुपपत्तिः, अधर्ममिथ्याज्ञानप्रमादहान्या धर्मज्ञानसमाधिसंपदा च विशिष्टमात्मान्तरमीश्वरः तस्य च धर्मसमाधिफलम् अणिमाद्यष्टविधमैश्वर्यम्, संकल्पानुविधायी चास्य धर्मः प्रत्यात्मवृत्तीन् धर्माधर्मसंचयान् पृथिव्यादीनि च भूतानि प्रवर्तयति, एवं च स्वकृताभ्यागमस्याऽलोपेन निर्माणप्राकाम्भमीश्वरस्य स्वकृतकर्मफलं वेदितव्यम्। आप्तकल पश्चायम्= यथा पिताऽपत्यानां तथा पितृभूत ईश्वरो भूतानाम्, न चात्मकल्पादन्यः कल्यः संभवति। न तावदस्य बुद्धिं विना कश्चिद् धर्मो लिङ्गभूतः शक्य उपपादयितुम्. आगमाच्च द्रष्टा बोद्धा सर्वज्ञाता ईश्वर इति। बुद्ध्यादिभिश्चात्मलिङ्गैर्निरुपाख्यमीश्वरं प्रत्यक्षानुमानागमविषयातीतं कः रक्त उपपादयितुम्। स्वकृताभ्यागमलोपेन च प्रवर्तमानस्यास्य यदुक्तं प्रतिषेधजातम् अकर्मनिमित्ते शरीरसर्गे तत्सर्वं प्रसज्यते इति ।। २१ ।। न्या. सू. ।। ४ ।। १ ।। २२ ।। अपर इदानीमाह--- अनिमित्ततो भावोत्पत्तिः--

कण्टकतैक्ष्ण्यादिदर्शनात् ।। २२ ।। अनिमित्ता शरीराद्युपत्तिः-- कण्टकतैक्ष्ण्यादिदर्शनात्= कण्टकस्य तैक्ष्ण्यं पर्वतधातूनां चित्रता ग्राव्णां श्लक्ष्णता. निनिर्मित्तं चोपादानं दृष्टं तथा शरीरसर्गोपीति ।। २२ ।। न्या. सू. ।। ४ ।। १ ।। २३ ।। अनिमित्तनिमित्तत्वाद् नाऽनिमित्ततः ।। २३ ।। "अनिमित्ततो भावोत्पत्तिः" इत्युच्यते. यतश्चोत्पद्यते तन्निमित्तम्, अनिमित्तस्य निमित्तत्वाद् नाऽनिमित्ता भावोत्पत्तिरिति ।। २३ ।। न्या. सू. ।। ४ ।। १ ।। २४ ।। निमित्ताऽनिमित्तयोरर्थान्तरभावादप्रतिषेधः ।। २४ ।। अन्यद्धि निमित्तम् अन्यच्च निमित्तप्रत्याख्यानं. न च प्रत्याख्यानमेव प्रत्याख्येयं यथा-- 'अनुदकः कमण्डडुत्थ;लुः' इति नोदकप्रतिषेध उदकं भवतीति ।। स खल्वयं वादः 'अकर्मनिमित्तः शरीरादिसर्गः' इत्येतस्मान्न भिद्यते अभेदात् तत्प्रतिषेधेनैव प्रतिषिद्धो वेदितव्य इति ।। २४ ।। न्या. सू. ।। ४ ।। १ ।। १९ ।। अन्ये तु मन्यन्ते--- सर्वमनित्यम्--

उत्पत्तिविनाशधर्मकत्वात् ।। २५ ।। किमनित्यं नाम ?, यस्य कदाचिद् भावस्तदनित्यम्= उत्पत्तिधर्मकमनुत्पन्नं नास्ति. विनाशधर्मकं चाऽविनष्टं नास्ति। किं पुनः ?, सर्वं भौतिकं च शरीरादि अभौतिकं च बुद्ध्यादि तदुभयमुत्पत्तिविनाशधर्मकं विज्ञायते तस्मात्तत्सर्वमनित्यमिति ।। २५ ।। न्या. सू. ।। ४ ।। १ ।। २६ ।। न-- अनित्यतानित्यत्वात् ।। २६ ।। यदि तावत् सर्वस्याऽनित्यता नित्या ? तन्नित्यत्वाद् न सर्वमनित्यम्। अथाऽनित्या ? तस्यामऽविद्यमानायां सर्वं नित्यमिति ।। २६ ।। न्या. सू. ।। ४ ।। १ ।। २७ ।। तदनित्यत्वम् अग्नेर्दाह्यं विनाश्याऽनुविनाशवत् ।। २७ ।। तस्या अनित्यताया अप्यनित्यत्वम्। कथम् ?, यथाऽग्निर्दाह्यं विनाश्याऽनुविनश्यति एवं सर्वस्यानित्यता सर्वं विनाश्यानुविनश्यतीति ।। २७ ।। न्या. सू. ।। ४ ।। १ ।। २८ ।। नित्यस्याऽप्रत्याख्यानम्-- यथोपलब्धि व्यवस्थानात् ।। २८ ।। अयं खलु वादो नित्यं प्रत्याचष्टे नित्यस्य च प्रत्याख्यानमनुपपन्नम्। कस्मात् ?, यथोपलब्धि व्यवस्थानात्= यस्योत्पत्तिविनाशधर्मकत्वमुपलभ्यते प्रमाणतस्तदनित्यम्. यस्य नोपलभ्यते तद् विपरीतम्, न च परमसूक्ष्माणां भूतानामाऽऽकाशकालदिगात्ममनसां तद्गुणानाां च केषांचित् सामान्यविशेषसमवायानां चोत्पत्तिविनाशधर्मकत्वं प्रमाणत उपलभ्यते तस्माद् नित्यान्येतानीति ।। २८ ।। न्या. सू. ।। ४ ।। १ ।। २९ ।। अयमन्य एकान्तः--- सर्वं नित्यम्-- पञ्चभूतनित्यत्वात् ।। २९ ।। भूतमात्रम् इदं सर्वं. तानि च नित्यानि-- भूतोच्छेदानुपपत्तेरिति ।। २९ ।। न्या. सू. ।। ४ ।। १ ।। ३० ।। न-- उत्पत्तिविनाशकारणोपलब्धेः ।। ३० ।। उत्पत्तिकारणं चोपलभ्यते विनाशकारणं च तत् सर्वनित्यत्वे व्याहन्यते इति ।। ३१ ।। न्या. सू. ।। ४ ।। १ ।। ३१ ।। तल्लक्षणावरोधादप्रतिषेधः ।। ३१ ।। यस्योत्पत्तिविनाशकारणमुपलभ्यते इति मन्यसे न तद् भूतलक्षणहीनमर्थान्तरं गृह्यते. भूतलक्षणावरोधाद् भूतमात्रमिदम् इत्यऽयुक्तोयं प्रतिषेध इति ।। ३१ ।। न्या. सू. ।। ४ ।। १ ।। ३२ ।। न-- उत्पत्तितत्कारणोपलब्धेः ।। ३२ ।। कारणसमानगुणस्योत्पत्तिः कारणं चोपलभ्यते न चैतदुभयं नित्यविषयम्, न चोत्पत्तितत्कारणोपलब्धिः शक्या प्रत्याख्यातुम्-- न चाऽविषया काचिदुपलब्धिः, उपलब्धिसामर्थ्यात् कारणेन समानगुणं कार्यमुत्पद्यते इत्यनुमीयते स खलूपलब्धेर्विषय इति, एवं

च तल्लक्षणावरोधोपपत्तिरिति। उत्पत्तिविनाशकारणप्रयुक्तस्य ज्ञातुः प्रयत्नो दृष्ट इति। प्रसिद्धश्चावयवी तद्धर्मा= उत्पत्तिविनाशधर्मा चावयवी सिद्ध इति। शब्दकर्मबुद्ध्यादीनां चाऽव्याप्तिः= पञ्चभूतनित्यत्वात् तल्लक्षणारोधाच्चेत्यनेन शब्दकर्मबुद्धिसुखदुःखेच्छाद्वषप्रयत्नाश्च न व्याप्तास्तस्मादनेकान्तः ।। स्वप्नविषयाभिमानवद् मिथ्योपलब्धिरितिचेत् ? भूतौपलब्धौ तुल्यम् ।। यथा स्वप्ने विषयाभिमान एवमुत्पत्तिकारणाभिमान इति, एवं च एतद् भूतोपलब्धौ तुल्यम्= पृथिव्याद्युपलब्धिरपि स्वप्नविषयाभिमानवत् प्रसज्यते ।। पृथिव्याद्यभावे सर्वव्यवहारविलोप इतिचेत् ? तदितरत्र समानम् ।। उत्पत्तिविनाशकारणोपलब्धिविषयस्याप्यभावे सर्वव्यवहारविलोप इति. सोयं नित्यानामतीन्द्रियत्वादविषयत्वाच्चोत्पत्तिविनाशयोः 'स्वप्नविषयाभिमानवत्' इत्यहेतुरिति ।। ३२ ।। अवस्थितस्योपादानस्य धर्ममात्रं निवर्तते धर्ममात्रमुपजायते स खलूत्पत्तिविनाशयोर्विषयः, यच्चोपजायते तत् प्रागप्युपजननादस्ति यच्च निवर्तते तद् निवृत्तमप्यस्तीति एवं च सर्वस्य नित्यत्वमिति--- न्या. सू. ।। ४ ।। १ ।। ३३ ।। न-- व्यवस्थानुपपत्तेः ।। ३३ ।। अयमुपजन इयं निवृत्तिरिति व्यवस्था नोपपद्यते-- उपजातनिवृत्तयोर्विद्यमानत्वात्, अयं धर्म उपजातोऽयं निवृत्त इति सद्भावाऽविशेषादव्यवस्था, इदानीमुपजननिवृत्ती नेदानीमिति कालव्यवस्था नोपपद्यते-- सर्वदा विद्यमानत्वात्, अस्य धर्मस्योपजननिवृत्ती नास्येति व्यवस्थानुपपत्तिः-- उभयोरविशेषात्, अनागतोऽतीत इति च कालव्यवस्थानुपपत्तिः-- वर्तमानस्य सद्भावलक्षणत्वात्। अविद्यमानस्यात्मलाभ उपजनो विद्यमानस्यात्महानं निवृत्तिः इत्येतस्मिन् सति नैते दोषाः, तस्माद् यदुक्तम्-- 'प्रागप्युपजननादस्ति निवृत्तं चास्ति (इति) तदयुक्तमिति ।। ३३ ।। न्या. सू. ।। ४ ।। १ ।। ३४ ।। अयमन्य एकान्तः--- सर्वं पृथक्-- भावलक्षणपृथक्त्वात् ।। ३४ ।। सर्वं नाना= न कश्चिदेको भावो विद्यते, कस्मात् ?, भावलक्षणपृथक्त्वात्= भावस्य लक्षणम्= अभिधानम्= येन लक्ष्यते भावः स समाख्याशब्दः तस्य पृथग्विषयत्वात्= सर्वोभावसमाख्याशब्दः समूहवाची, 'कुम्भः' इति संज्ञाशब्दो गन्धरसरूपस्पर्शसमूहे ब्रध्नपार्श्वग्रीवादिसमूहे च वर्तते, निदर्शनमात्रं चेदमिति ।। ३४ ।। न्या. सू. ।। ४ ।। १ ।। ३५ ।। न-- अनेकलक्षणैरेकभावनिष्पत्तेः ।। ३५ ।। 'अनेकविधलक्षणैः' इति मध्यमपदलोपी समासः, गन्धादिभिश्च गुणैर्बुध्नादिभिश्चावयवैः संबद्ध एको भावो निष्पद्यते। गुणव्यतिरिक्तं च द्रव्यम् अवयवातिरिक्तश्चाऽवयवीति, विभक्तन्यायं चैतदुभयमिति ।। ३५ ।। न्या. सू. ।। ४ ।। १ ।। ३६ ।। अथापि--- लक्षणव्यवस्थानादेवाऽप्रतिषेधः ।। ३६ ।। 'न कश्चिदेको भावः' इत्ययुक्तः प्रतिषेधः, कस्मात् ?. लक्षणव्यवस्थानादेव= यदिह लक्षणं भावस्य संज्ञाशब्दभूतं तदेकस्मिन् व्यवस्थितम्-- 'यं कुम्भमद्राक्षं तं स्पृशामि' 'यमेवाऽस्प्राक्षं तं पश्यामि' इति. नाऽणुसमूहो गृह्यते इति. अणुसमूहे चागृह्यमाणे यद् गृह्यते तदेकमेवेति ।। अथाप्येतदनूक्तम्-- नास्त्येको भावो यस्मात्समुदायः। एकानुपपत्तेर्नास्त्येव समूहः। नास्त्येको भावो यस्मात् समूहे भावशब्दप्रयोगः, एकस्य चानुपपत्तेः समूहो नोपपद्यते-- एकसमुच्चयो हि समूह इति, व्याहतत्वादनुपपन्नम्-- 'नास्त्येको भावः' इति। यस्य प्रतिषेधः प्रतिज्ञायते-- 'समूहे भावशब्दप्रयोगात्' इति हेतुं ब्रुवता स एवाभ्युनुज्ञायते-- एकसमुच्चयो हि समूह इति। समूहे भावशब्दप्रयोगादिति च समूहमाश्रित्य प्रत्येकं समूहिप्रतिषेधः-- नास्त्येको भाव इति, सोयमुभयतो व्याघाताद् यत्किंचन वाद इति ।। ३६ ।। न्या. सू. ।। ४ ।। १ ।। ३७ ।। अयमपर एकान्तः--- सर्वमभावः-- भावेष्वितरेतराभावसिद्धेः ।। ३७ ।। यावद् भावजातं तत्सर्वमऽभावः, कस्मात् ?, भावेष्वितरेतराभावसिद्धेः= 'असन् गौरश्वात्मना' 'अनश्वो गौः' 'असन्नऽश्वो गवात्मना' 'अगौरवश्वः' इत्यऽसत्प्रत्ययस्य प्रतिषेधस्य च भावशब्देन सामानाधिकरण्यात् सर्वमभाव इति।। प्रतिज्ञावाक्ये पदयोः प्रतिज्ञाहेत्वोश्च व्याघातादयुक्तम् ।। अनेकस्याऽशेषता सर्वशब्दस्यार्थः भावप्रतिषेधश्चाऽभावशब्दस्यार्थः. पूर्वं सोपाख्यम् उत्तरं निरुपाख्यम्. तत्र समुपाख्यायमानं कथं निरुपाख्यमऽभावः स्यादिति= न जात्वभावो निरुपाख्योऽनेकतया= अशेषतया शक्यः प्रतिज्ञातुमिति।

सर्वमेतदभाव इति चेत् ?= यदिदं सर्वमिति मन्यसे तद्भाव इत्येवं चेत् ? अनिवृत्तो व्याघातः-- अनेकमशेषं चेति नाऽभावप्रत्ययेन शक्यं भवितुम्. अस्ति चायं प्रत्ययः-- सर्वमिति. तस्मान्नाऽभाव इति। प्रतिज्ञाहेत्वोश्च व्याघातः-- 'सर्वमभावः' इति भावप्रतिषेधः प्रतिज्ञा. 'भावेष्वितरेतराभावसिद्धेः' इतिहेतुः.

भावेष्वितरेतराभावमऽनुज्ञाय= आश्रित्य चेतरेतराभावसिद्धौ सर्वमभाव इत्युच्यते. यदि सर्वमभावः ? "भावेष्वितरेतराभावसिद्धेः" इति नोपपद्यते. अथ भावेष्वितरेतराभावसिद्धि ? सर्वमभाव इति नोपपद्यते ।। ३७ ।। न्या. सू. ।। ४ ।। १ ।। ३८ ।। सूत्रेण चाभिसंबन्धः--- न-- स्वभावसिद्धेर्भावानाम् ।। ३८ ।। न सर्वमभावः, कस्मात् ? स्वेन भावेन सद्भावाद् भावानाम्= स्वेन धर्मेण भावा भवन्तीति प्रतिज्ञायते। कश्च स्वो धर्मो भावानाम् ?, द्रव्यगुणकर्मणां सदादि सामान्यम्. द्रव्याणां क्रियावदित्येवमादिर्विशेषः. स्पर्शपर्यन्ताः पृथिव्या इति च, प्रत्येकं चाऽननो्तो भेदः, सामान्यविशेषसमवायानां च विशिष्टा धर्मा गृह्यन्ते, सोयमभावस्य निरुपाख्यत्वात् संप्रत्यायकोऽर्थभेदो न स्यात्. अस्ति त्वयं तस्मान्न सर्वमभाव इति। अथ वा--- "न-- स्वभावसिद्धेर्भावानाम्" इति स्वरूपसिद्धेरिति. गौरितिप्रयुज्यमाने शब्दे जातिविशिष्टं द्रव्यं गृह्यते नाभावमात्रम्. यदि च सर्वमभावः गौरित्यभावः प्रतीयेत, गोशब्देन चाभाव उच्येत, यस्मात्तु गोशब्दप्रयोगे द्रव्यविशेषः प्रतीयते नाभावस्तस्मादयुक्तमिति। अथ वा-- "न-- स्वभावसिद्धेः" इति 'असन् गौरश्वात्मना' इति गवात्मना कस्मान्नोच्यते ? अवचनाद् 'गवात्मना गौरस्ति' इति स्वभावसिद्धिः, 'अनश्वोऽश्वः' इति वा 'गौरगौः' इति वा कस्मान्नोच्यते ? अवचनात् स्वेन रूपेण विद्यमानता द्रव्यस्येतिविज्ञायते। अव्यतिरेकप्रतिषेधे च भावानामऽसत्प्रत्ययसामानाधिकरण्यम्। संयोगादिसंबन्धो व्यतिरेकः अत्राऽव्यतिरेकोऽभेदाख्यसंबन्धः तत्प्रतिषेधे चासत्प्रत्ययसामानाधिकरण्यं यथा-- 'न सन्ति कुण्डेड्डुत्थ; बदराणि' इति, 'असन् गौरश्वात्मना' 'अनश्वोगौः' इति च गवाश्वयोरव्यतिरेकः प्रतिषिध्यते= गवाश्वयोरेकत्वं नास्तीति. तसो्मिन् प्रतिषिध्यमाने भावेन गवा सामाधिकरण्यमसत्प्रत्ययस्य-- 'असन् गौरश्वात्मना' इति. यथा 'न सन्ति कुण्डेड्डुत्थ; बदराणि' इति कुण्डेड्डुत्थ; बदरसंयोगे प्रतिषिध्यमाने सद्भिरसत्प्रत्ययस्य सामाधिकरण्यमिति ।। ३८ ।। न्या. सू. ।। ४ ।। १ ।। ३९ ।। न स्वभावसिद्धिः-- आपेक्षिकत्वात् ।। ३९ ।। अपेक्षाकृतम् आपेक्षिकम्, ह्रस्वापेक्षाकृतं दीर्घं दीर्घापेक्षाकृतं ह्रस्वम्. न स्वेनात्मनाऽवस्थितं किंचित्। कस्मात् ?. अपेक्षासामर्थ्यात्. तस्मान्न स्वभावसिद्धिर्भावानामिति ।। ३९ ।। न्या. सू. ।। ४ ।। १ ।। ४० ।। व्याहतत्वादयुक्तम् ।। ४० ।। यदि ह्रस्वापेक्षाकृतं दीर्घं किमिदानीमपेक्ष्य 'ह्रस्वम्' इति गृह्यते ?। अथ दीर्घापेक्षाकृतं ह्रस्वम् ? दीर्घमनापेक्षिकम्, एवमितरेतराश्रययोरेकाभावेऽन्यतराभावादुभयाभाव इत्यपेक्षाव्यवस्थानुपपन्ना। स्वभावसिद्धावऽसत्यां समयोः परिमण्डड्डुत्थ;लयोर्वा द्रव्ययोरापेक्षिके दीर्घत्वह्रस्वत्वे कस्मान्न भवतः ?। अपेक्षायामनपेक्षायां च द्रव्ययोरभेदः= यावती द्रव्ये अपेक्षमाणे तावती एवानपेक्षमाणे नाऽन्यतरत्र भेदः। आपेक्षिकत्वे तु सत्यऽन्यतरत्र विशेषोपजनः स्यादिति। किमपेक्षासामर्थ्यमितिचेत् ? द्वयोर्ग्रहणेऽतिश्यग्रहणोपपत्तिः। द्वे द्रव्ये पश्यन् एकत्र विद्यमानमतिशयं गृढद्धठुड़१४;णाति तद् दीर्घमिति व्यवस्यति, यच्च हीनं गृढद्धठुड़१४;णाति तद् ह्रस्वमिति व्यवस्यतीति, एतच्चापेक्षासामर्थ्यमिति ।। ४० ।। न्या. सू. ।। ४ ।। १ ।। ४१ ।। अथेमे संख्यैकान्ताः-- सर्वमेकम्-- सदऽविशेषात्, सर्वं द्वेधा-- नित्यानित्यभेदात्, सर्वं त्रेधा-- ज्ञाता ज्ञानं ज्ञेयमिति, सर्वं चतुर्धा-- प्रमाता प्रमाणं प्रमेयं प्रमितिरिति, एवं यथासंभवमन्येऽपीति। तत्र परीक्षा--- संख्यैकान्ताऽसिद्धिः-- कारणानुपपत्त्युपपत्तिभ्याम् ।। ४१ ।। यदि साध्यसाधानयोर्नानात्वम् ? एकान्तो न सिध्यति-- व्यतिरेकात्, अथ साध्यसाधनयोरभेदः ? एवमप्येकान्तो न सिध्यति-- साधनाभावात्, न हि तमन्तरेण कस्यचित् सिद्धिरिति ।। ४१ ।। न्या. सू. ।। ४ ।। १ ।। ४२ ।। न-- कारणावयवभावात् ।। ४२ ।। न संख्यैकान्तानामसिद्धिः, कस्मात् ?. कारणस्यावयवभावात्= अवयसवः कश्चित् साधनभूत इत्यऽव्यतिरेकः। एवं द्वैतादीनामपीति ।। ४२ ।। न्या.

सू. ।। ४ ।। १ ।। ४३ निरवयवत्वादहेतुः ।। ४३ ।। "कारणस्यावयवभावात्" इत्यहेतुः, कस्मात् ? 'सर्वमेकम्' इत्यनपवर्गेण प्रतिज्ञाय कस्यचिदेकत्वमुच्यते तत्र व्यपवृक्तोऽवयवः साधनभूतो नोपपद्यते, एवं द्वैतादिष्वपीति। ते खल्विमे संख्यैकान्ता यदि विशेषकारितस्याऽर्थभेदविस्तरस्य प्रत्याख्यानेन वर्तन्ते ? प्रत्याक्षानुमानागमविरोधाद् मिथ्यावादा भवन्ति। अथाभ्यनुज्ञानेन वर्तन्ते ? समानधर्मकारितोऽर्थसंग्रहो विशेषकारितश्चार्थभेद इत्येवमेकान्तत्वं जहतीति। ते खल्वेते तत्त्वज्ञानप्रविवेकार्थमेकान्ताः परीक्षिता इति ।। ४३ ।। न्या. सू. ।। ४ ।। १ ।। ४४ ।। प्रेत्यभावानन्तरं फलम्। तस्मिन्--- सद्यः कालान्तरे च फलनिष्पत्तेः संशयः ।। ४४ ।। 'पचति दोग्धि' इति सद्यः फलम् ओदनपयसी, 'कर्षति वपति' इति कालान्तरे फलं शस्याधिगम इति, अस्ति चेयं क्रिया-- "अग्गिहोत्रं जुहुयात् स्वर्गकामः" इति एतस्याः फले संशयः ।। ४४ ।। न्या. सू. ।। ४ ।। १ ।। ४५ ।। न सद्यः-- कालान्तरोपभोग्यत्वात् ।। ४५ ।। स्वर्गः फलं श्रूयते तच्च भिन्नेऽस्मिन् देहभेदादुत्पद्यते इति न सद्यः, ग्रामादिकामानामारम्भफलमिति ।। ४५ ।। न्या. सू. ।। ४ ।। १ ।। ४६ ।। कालान्तरेणाऽनिष्पत्तिः-- हेतुविनाशात् ।। ४६ ।। ध्वस्तायां प्रवृत्तौ प्रवृत्तेः फलं न कारणमन्तरेणोत्पत्तमर्हति-- न खलु वै विनष्टात् कारणात् किंचिदुत्पद्यते इति ।। ४६ ।। न्या. सू. ।। ४ ।। १ ।। ४७ ।। प्राङ् निष्पत्तेर्वृक्षफलवत् तत् स्यात् ।। ४७ ।। यथा फलार्थिना वृक्षमूले सेकादि परिकर्म क्रियते तस्मिंश्च प्रध्वस्ते पृथिवीधातुरब्धातुना संगृहीते आन्तरेण तेजसा पच्यमानो रसद्रव्यं निर्वर्तयति स द्रव्यभूतो रसो वृक्षानुगतः पाकविशिष्टो व्यूहविशेषेण संनिविशमानः पर्णादि फलं निर्वर्तयति एवं परिषेकादि कर्मचार्थवत्-- न च विनष्टात् फलनिष्पत्तिः। तथा प्रवृत्त्या संस्कारो धर्माधर्मलक्षणो जन्यते स जातो निमित्तान्तरानुगृहीतः कालान्तरे फलं निष्पादयतीति. उक्तं चैतत्-- "पूर्वकृतफलानुबन्धात् तदुत्पत्तिः ३-२-६२" इति ।। ४७ ।। न्या. सू. ।। ४ ।। १ ।। ४८ ।। तदिदं प्राङ् निष्पत्तेर्निष्पद्यमानम्-- नाऽसत्. न सत्. न सदसत्-- सदसतोर्वैधर्म्यात् ।। ४८ ।। प्राङ्निष्पत्तेर्निष्पत्तिधर्मकं नाऽसत्-- उपादाननियमात्= कस्यचिदुत्पत्तये किंचिदुपादेयं न सर्वं सर्वस्येत्यऽसद्भावे नियमो नोपपद्यते इति। न सत्-- प्रागुत्पत्तेर्विद्यमानस्योत्पत्तिरनुपपन्नेति। न सदसत्-- सदसतोर्वैधर्म्यात्= 'सत्' इत्यर्थाभ्यनुज्ञा. 'असत्' इत्यर्थप्रतिषेधः एतयोर्व्याघातो वैधर्म्यं व्याघातादव्यतिरेकानुपपत्तिरिति ।। ४८ ।। न्या. सू. ।। ४ ।। १ ।। ४९ ।। प्रागुत्पत्तेरुत्पत्तिधर्मकमऽसदित्यऽद्धा, कस्मात् ?--- उत्पादव्ययदर्शनात् ।। ४९ ।। यत्पुनरुक्तम्-- 'प्रागुत्पत्तेः कार्यं नाऽसत्-- उपादाननियमात्' इति ?--- न्या. सू. ।। ४ ।। १ ।। ५० ।। बुद्धिसिद्धं तु तदऽसत् ।। ५० ।। इदमस्योत्पत्तये समर्थं न सर्वमिति प्रागुत्पत्तेर्नियतकारणं कार्यं बुद्ध्या सिद्धम्-- उत्पत्तिनियमदर्शनात् तस्मादुपादाननियमस्योपपत्तिः। सति तु कार्ये प्रागुत्पत्तेरुत्पत्तिरेव नास्तीति ।। ५० ।। न्या. सू. ।। ४ ।। १ ।। ५१ ।। आश्रयव्यतिरेकाद् वृक्षफलोत्पत्तिवदित्यहेतुः ।। ५१ ।। मूलसेकादि परिकर्म फलं चोभयं वृक्षाश्रयम्. कर्म चेह शरीरे फलं चाऽमुत्रेति आश्रयव्यतिरेकादहेतुरिति ।। ५१ ।। न्या. सू. ।। ४ ।। १ ।। ५२ ।। प्रीतेरात्माश्रयत्वादप्रतिषेधः ।। ५२ ।। प्रीतिरात्मप्रत्यक्षत्वादात्माश्रया तदाश्रयमेव कर्म धर्मसंज्ञितम्-- धर्मस्यात्मगुणत्वात् तस्मादाश्रयव्यतिरेकानुपपत्तिरिति ।। ५२ ।। न्या. सू. ।। ४ ।। १ ।। ५३ ।। न-- पुत्रपशुस्त्रीपरिच्छदहिरण्याऽन्नादिफलनिर्देशात् ।। ५३ ।। पुत्रादि फलं निर्दिश्यते न प्रीतिः-- "ग्रामकामो यजेत" "पुत्रकामो यजेत" इति. तत्र यदुक्तम्-- 'प्रीतिः फलम्' इति एतदयुक्तम् ।। ५३ ।। न्या. सू. ।। ४ ।। १ ।। ५४ ।। तत्संबन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः ।। ५४ ।। पुत्रादिसंबन्धात् फलं प्रीतिलक्षणमुत्पद्यते इति पुत्रादिषु फलवदुपचारो यथाऽन्ने प्राणशब्दः-- "अन्नं वै प्राणाः" इति ।। ५४ ।। फलानन्तरं दुःखमुद्दिष्टमुक्तं च-- "बाधनालक्षणं दुःखम् १-१-२१" इति. तत् किमिदं प्रत्यात्मवेदनीयस्य= सर्वजन्तुप्रत्यक्षस्य सुखस्य प्रत्याख्यानम् ? आहोस्विदन्यः कल्पः ? इति, अन्य इत्याह, कथम् ?, न वै सर्वलोकसाक्षिकं सुखं शक्यं प्रत्याख्यातुम्। अयं तु जन्ममरणप्रबन्धानुभवनिमित्ताद् दुःखाद् निर्विण्णस्य दुःखं जिहासतो

दुःखसंज्ञाभावनोपदेशो दुःखहानार्थ इति। कया युक्त्या ?, सर्वे खलु सत्त्वनिकायाः सर्वाण्युत्पत्तिस्थानानि सर्वः पुनर्भवो बाधनानुषक्तो दुःखसाहचर्यात् "बाधनालक्षणं दुःखम् १-१-२१" इत्युक्तम्. ऋषिभिर्दुःखसंज्ञाभावनमुपदिश्यते, अत्र च हेतुरुपादीयते--- न्या. सू. ।। ४ ।। १ ।। ५५ ।।

विविधबाधनायोगाद् दुःखमेव जन्मोत्पत्तिः ।। ५५ ।। जन्म= जायते इति शरीरेन्द्रियबुद्धयः, शरीरादीनां संस्थानविशिष्टानां प्रादुर्भाव उत्पत्तिः, विविधा च बाधना-- हीना मध्यमा उत्कृष्टा चेति. उत्कृष्टा नारकिणां. तिरश्चां तु मध्यमा, मनुष्यापां हीनाः. देवानां हीनतरा वीतरागाणां च, एवं सर्वमुत्पत्तिस्थानं विविधबाधनानुषक्तं पश्यतः सुखे तत्साधनेषु च शरीरेन्द्रियबुद्धिषु दुःखसंज्ञा व्यवतिष्ठते. दुःखसंज्ञाव्यवस्थानात् सर्वलोकेष्वऽनभिरतिसंज्ञा भवति. अनभिरतिसंज्ञामुपासीनस्य सर्वलोकविषयातृष्णा विच्छिद्यते. तृष्णाप्रहाणात् सर्वदुःखाद् विमुच्यते इति, यथा विषयोगात् पयो विषयमिति बुध्यमानो नोपादत्ते. अनुपाददानो मरणदुःखं नाप्नोति ।। ५५ ।। न्या. सू. ।। ४ ।। १ ।। ५६ ।। दुःखोद्देशस्तु न सुखस्य प्रत्याख्यानम्, कस्मात् ?--- सुखस्याप्यन्तरालनिष्पत्तेः ।। ५६ ।। न खल्वयं दुःखोद्देशः सुखस्य प्रत्याख्यानम्, कस्मात् ?, सुखस्यान्तरालनिष्पतेः= निष्पद्यते खलु बाधनान्तरालेषु सुखं प्रत्यात्मवेदनीयं शरीरिणां तदशक्यं प्रत्याख्यातुमिति ।। ४६ ।। न्या. सू. ।। ४ ।। १ ।। ५७ ।। अथापि--- बाधनाऽनिवृत्तेर्वेदयतः पर्येषणदोषादप्रतिषेधः ।। ५७ ।। सुखस्य दुःखोद्देशेनेति प्रकरणात्, पर्येषणम्= प्रार्थना= विषयार्जनतृष्णा. पर्येषणस्य दोषो यदयं वेदयमानः प्रार्थयते. तच्चाऽस्य प्रार्थितं न संपद्यते. संपद्य वा विपद्यते. न्यूनं वा संपद्यते. बहुप्रत्यनीकं वा संपद्यते. इत्येतस्मात् पर्येषणदोषात् नानाविधो मानसः संतापो भवति. एवं वेदयतः पर्येषणदोषाद् बाधनाया अनवृत्तिः. बाधनाऽनिवृत्तेर्दुःखसंज्ञाभावनमुद्दिश्यते. अनेन कारणेन दुःखं जन्म न तु सुखस्याभावादिति। अथाप्येतदनूक्तम्--- "कामं कामयमानस्य यदा कामः समृध्यते। अथैनमपरः कामः क्षिप्रमेव प्रबाधते ।।" "अपि चेदुदनेमि समन्ताद् भूमिमालभते सगवाश्वां न स तेन धनेन धनैषी तृप्यति किं नु सुखं धनकामे" इति ।। ५७ ।। न्या. सू. ।। ४ ।। १ ।। ५८ ।। दुःखविकल्पे सुखाभिमानाच्च ।। ५८ ।। दुःखसंज्ञाभावनोपदेशः क्रियते, अयं खलु सुखसंवेदने व्यवस्थितः सुखं परमपुरुषार्थं मन्यते-- न सुखादन्यद् निःश्रेयसमस्ति. सुखे प्राप्ते चरितार्थः कृतकरणीयो भवति. मिथ्यासंकल्पात् मुखे तत्साधनेषु च विषयेषु संरज्यते. संरक्तः सुखाय घटते. घटमानस्याऽस्य जन्मजराव्याधिप्रायणाऽनिष्टसंयोगेष्टवियोगप्रार्थितानुपपत्तिनिमित्तमनेकविधं यावद् दुःखमुत्पद्यते तं दुःखविकल्पं सुखमित्यभिमन्यते. सुखाङ्गभूतं दुःखं-- न दुःखमनासाद्य शक्यं सुखमवाप्तुम्. तादर्थ्यात् सुखमेवेदमिति सुखसंज्ञोपहतप्रज्ञः-- 'जायस्य म्रियस्व संघाव' इतः संसारं नातिवर्तते. तदस्याः सुखसंज्ञानयाः प्रतिपक्षो दुःखसंज्ञाभावनमुपदिश्यते. दुःखानुषङ्गाद् दुःखं जन्मेति न सुखस्याभावात्। यद्येवं कस्मात् 'दुःखं जन्म' इति नोच्यते ?. सोयमेवं वाच्ये यदेवकाह-- "दुःखमेव जन्म ५५" इति तेन सुखाभावं ज्ञापयतीति, जन्मविनिग्रहार्थीयो वै खल्वयमेवशब्दः, कथम् ? न दुःखं जन्म स्वरूपतः किं तु दुःखोपचारात्. एवं सुखमपीति एतदऽनेनैव निवर्त्यते न तु दुःखमेव जन्मेति ।। ५८ ।। न्या. सू. ।। ४ ।। १ ।। ५९।।

दुःखोपदेशानन्तरमपवर्गः स प्रत्याख्यायते--- ऋणक्लेशप्रवृत्त्यनुबन्धादपवर्गाभावः ।। ५९ ।।

ऋणानुबन्धान्नास्त्यपवर्गः= "जायमानो ह वै ब्राह्मणस्त्रिभिर्ऋणैर्ऋणवान् जायते-- ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजाया पितृभ्यः" इति ऋणानि. तेषामनुबन्धः= स्वकर्मभिः संबन्धः-- कर्मसंबन्धवचनात्-- "जरामर्य वा एतत्सत्रं यदग्निहोत्रं दर्शपूर्णमासौ चेति= जरया ह एष तस्मात् सत्राद्विमुच्यते मृत्युना ह वा" इति ऋणानुबन्धादपवर्गानुष्ठानकालो नास्तीत्यऽपवर्गाभावः। क्लेशानुबन्धान्नस्त्यपवर्गः= क्लेशानुबद्ध एवायं म्रियते क्लेशानुबद्धश्च जायते नास्य क्लेशानुबन्धविच्छेदो गृह्यते। प्रवृत्त्यनुबन्धान्नास्त्यपवर्गः= जन्मप्रभृत्यऽयं यावत्प्रायणं वाग्बुद्धिशरीरारम्भेणाऽविमुक्तो गृह्यते तत्र यदुक्तम्-- "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये

तदनन्तरापायादपवर्गः १-१-२" इति तदनुपपन्नमिति ।। ५९ ।। न्या. सू. ।। ४ ।। १ ।। ६० ।।
अत्राभिधीयते-- यत्तावत् 'ऋणानुबन्धात्' इति ?. ऋणैरिव ऋणैरिति ---
प्रधानशब्दानुपपत्तेर्गुणशब्देनानुबादः-- निन्दाप्रशंसोपपत्तेः ।। ६० ।। "ऋणैः" इति नायं प्रधानशब्दः, यत्र खल्वेकः प्रत्यादेयं ददाति द्वितीयश्च प्रतिदेयं गृढद्धडुड़१४;णाति तत्रास्य दृष्टत्वात् प्रधानमृणशब्दः. न चैतदिहोपपद्यते प्रधानशब्दानुपपत्तेर्गुणशब्देनायमनुवादः-- ऋणैरिव ऋणैरिति, प्रयुक्तोपमं चैतद् यथा-- "अग्निर्माणवकः"इति= अन्यत्र दृष्टश्चायमृणशब्द इह प्रयुज्यते यथाग्निशब्दो माणवके। कथं गुणशब्देनानुवादः ?, निन्दाप्रसंसोपपत्तेः= कर्मलोपे ऋणीव ऋणाऽदानाद् निन्द्यते. कर्मानुष्ठाने च ऋणीव ऋणदानाद् प्रशस्यते स एवोपमार्थ इति। "जायमानः" इति गुणशब्दः-- विपर्ययेऽनधिकारात्= "जायमानो ह वै ब्राह्मणः" इति च शब्दो गृहस्थः संपद्यमानः, जायमान इति= यदायं गृहस्थो जायते तदा कर्मभिरधिक्रियते-- मातृतो जायमानस्यानधिकारात्= यदा तु मातृतो जायते कुमारो न तदा कर्मभिरधिक्रियते-- अर्थिनः शक्तस्य चाधिकारात्= अर्थिनः कर्मभिरधिकारः-- कर्मविधौ कामसंयोगस्मृतेः-- "अग्निहोत्रं जुहुयात् स्वर्गकामः" इत्येवमादि, शक्तस्य च प्रवृत्तिसंभवात्= शक्तस्य कर्मभिरधिकारः-- प्रवृत्तिसंभवात्= शक्तः खलु विहिते कर्मणि प्रवर्तते नेतर इति। उभयाभावस्तु प्रधानशब्दार्थे। मातृतो जायमाने कुमारे उभयम्= अर्थिता शक्तिश्च न भवतीति, न भिद्यते लौकिकाद् वाक्याद् वैदिकं वाक्यम्-- प्रेक्षापूर्वकारिपुरुषप्रणीतत्वेन, तत्र लौकिकस्तावदपरीक्षकोपि न जातमात्रं कुमारमेवं ब्रूयात्-- 'अधीष्व यजस्व ब्रह्मचर्यं चर' इति. कुत एष ऋषिरुपपन्नाऽनवद्यवादी उपदेशार्थेन प्रयुक्त उपदिशति ?, न खलु वै नर्तकोन्धेषु प्रवर्तते न गायनो बधिरेष्विति। उपदिष्टार्थविज्ञानं चोपदेशविषयः= यश्चोपदिष्टमर्थं विजानाति तं प्रत्युपदेशः क्रियते न चैतदस्ति जायमानकुमारके इति। गार्हस्थ्यलिङ्गं च मन्त्रब्राह्मणं कर्माभिवदति= यच्च मन्त्रब्राह्मणं कर्माभिवदति तत् पत्नीसंबन्धादिना गार्हस्थ्यलिङ्गेनोपपन्नं तस्माद् गृहस्थोयं जायमानोऽभिधीयते इति ।। अर्थित्वस्य चाविपरिणामे जरामर्यवादोपपत्तिः। यावच्चास्य फलेनार्थित्वं न विपरिणमते= न निवर्तते तावदनेन कर्मानुष्ठेयमित्युपपद्यते जरामर्यवादस्तं प्रतीति. "जरया ह वा" इत्यायुषस्तुरीयस्य= चतुर्थस्य प्रव्रज्यायुक्तस्य वचनम्-- "जरया ह वा एष एतस्माद्विमुच्यते" इति. आयुषस्तुरीयम्= चतुर्थंप्रव्रज्यायुक्तं जरेत्युच्यते-- तत्र हि प्रव्रज्या विधीयते, अत्यन्तजरासंयोगे "जरया ह वा" इत्यनर्थकम्। 'अशक्तो विमुच्यते' इत्येतदपि नोपपद्यते-- स्वयमशक्तस्य बाह्यां शक्तिमाह-- "अन्तेवासी वा जुहुयात् ब्रह्मणा स परिक्रीतः. क्षीरहोता वा जुहुयाद् धनेन स परिक्रीतः" इति अथापि विहितं वाऽनूद्येत ? कामाद्वार्थः परिकल्प्येत ? विहितानुवचनं न्याय्यमिति, ऋणवानिवाऽस्वतन्त्रो गृह्यस्थः कर्मसु प्रवर्तते इत्युपपन्नं वाक्यस्य सामर्थ्यम्। फलस्य हि साधनानि प्रयत्नविषयो न फलं. तानि संपन्नानि फलाय कल्पन्ते। विहितं च जायमानं विधीयते च जायमानं तेन यः संबध्यते सोयं जायमान इति। प्रत्यक्षविधानाभावादितिचेत् ? न-- प्रतिषेधस्यापि प्रत्यक्षविधानाभावादिति। प्रत्यक्षतो विधीयते गार्हस्थ्यं ब्राह्मणेन यदि चांश्रमान्तरमभविष्यत् तदपि व्यधास्यत् प्रत्यक्षतः. प्रत्यक्षविधानाभावान्नास्त्याश्रमान्तरमिति, न-- प्रतिषेधस्यापि प्रत्यक्षविधानाभावात्= न प्रतिषेधोपि वै ब्राह्मणेन प्रत्यक्षतो विधीयते-- 'न सन्त्याश्रमान्तराणि एक एव गृहस्थाश्रमः' इति. प्रतिषेधस्य प्रत्यक्षतोऽश्रवणादयुक्तमेतदिति ।। अधिकाराच्च विधानं विद्यान्तरवत् ।। यथा शास्त्रान्तराणि स्वे स्वेऽधिकारे प्रत्यक्षतो विधायकानि नाऽर्थान्तराभावाद् एवमिदं ब्राह्मणं गृहस्थशास्त्रं स्वेऽधिकारे प्रत्यक्षतो विधायकं नाश्रमान्तराणामभावादिति। ऋग्ब्राह्मणं चापवर्गाभिधाय्यऽभिधीयते= ऋचश्च ब्राह्मणानि चापवर्गाभिवादीनि भवन्ति. ऋवश्च तावत्-- "कर्मभिर्मृत्युमृषयो निषेदुः प्रजावन्तो द्रविणमिच्छमानाः, अथापरे ऋषयो मनीषिणः

परं कर्मभ्योऽमृतत्वमानशुः," "न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः" "परेण नाकं निहितं गुहायां विभ्राजते तद् यतयो विशन्ति" "वेदाहमेतंपुरुषं महान्तमादित्यवर्णं तमसः परस्तात्. तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय"। अथ ब्राह्मणानि-- "त्रयो धर्मस्कन्धाः-- यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याऽऽचार्यकुलवासीति तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन् सर्वे एवैते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति" "एतमेव प्रव्राजिनो लोकमभीप्सन्तः प्रव्रजन्तीति" "अथो खल्वाहुः-- काममय एवायं पुरुष इति स यथाकामो भवति तथाक्रतुर्भवति यथाक्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यते" इति कर्मभिः संसरणमुक्त्वा प्रकृतमन्यदुपदिशन्ति-- "इति तु कामयमानोऽथाऽकामयमानो योऽकामो निष्काम् आत्मकाम आप्तकामो भवति न तस्य प्राणा उत्क्रामन्ति इहैव समवलीयन्ते ब्रह्मैव सन् ब्रह्माप्येति" इति, तत्र यदुक्तम्-- 'ऋणानुबन्धादपवर्गाभावः' इति एतदयुक्तमिति। "येचत्वारः पथयो देवयानाः" इति च चातुगश्रम्यश्रुतेरैकाश्रम्यानुपपत्तिः। फलार्थिनश्चेदं ब्राह्मणम्-- "जरामर्यं वा एतत्सत्रं यदग्निहोत्रं दर्शपूर्णमासौ च" इति ।। ६० ।। न्या. सू. ।। ४ ।। १ ।। ६१ ।। कथम् ?--- समारोपणादात्मन्यप्रतिषेधः ।। ६१ ।। "प्राजापत्यामिष्टिं निरुप्य नस्यां सर्ववेदसं हुत्वा आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेत्" इति श्रूयते तेन विजानीमः-- प्रजावित्तलोकैषणाभ्यो व्युत्थितस्य निवृत्ते फलार्थित्वे समारोपणं विधीयते इति, एवं च ब्राह्मणानि-- "सोऽन्यद् व्रतमुपाकरिष्यमाणो याज्ञवल्क्यो मैत्रेयीमितिहोवाच-- प्रव्रजिष्यन् वा अरे अहमस्मात् स्थानादस्मि हन्त तेऽनया कात्यायन्या सहान्तं करवाणीति. अथाप्युक्तानुशासनासि मैत्रेयि एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राज" इति।। ६१ ।। न्या. सू. ।। ४ ।। १ ।। ६२ ।। पात्रचयान्तानुपपत्तेश्च फलाभावः ।। ६२ ।। जरामर्ये च कर्मण्यऽविशेषेण कल्प्यमाने सर्वस्य पात्रचयान्तानि कर्माणीति प्रसज्यते तत्रैषणाव्युत्थानं न श्रूयेत-- "एतद्ध स्म वै तत्पूर्वे ब्राह्मणा अनूचाना विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोयमात्माऽयं लोक इति. ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाऽथ भिक्षाचर्यं चरन्ति" इति, एषणाभ्यश्च व्युत्थितस्य पात्रचयान्तानि कर्माणि नोपपद्यन्ते इति नाऽविशेषेण कर्तुः प्रयोजकं फलं भवतीति। चातुराश्रम्यविधानाच्चेतिहासपुराणधर्मशास्त्रेष्वैकाश्रम्यानुपपत्तिः। तदप्रमाणमितिचेत् ? न-- प्रमाणेन प्रामाण्याभ्यनुज्ञानात्। प्रमाणेन खलु ब्राह्मणेनेतिहासपुराणस्य प्रामाण्यमभ्यनुज्ञायते-- "ते वा खल्वेते अथर्वाङ्गिरस एतदितिहासपुराणमभ्यवदन् इतिहासपुराणं पञ्चमं वेदानां वेदः" इति. तस्मादऽयुक्तमेतत्-- अप्रामाण्यमिति। अप्रामाण्ये च धर्मशास्त्रस्य प्राणभृतां व्यवहारलोपात् लोकोच्छेदप्रसङ्गः, द्रष्ट्टप्रवक्तृसामान्याच्चाऽप्रामाण्यानुपपत्तिः= ये एव मन्त्रब्राह्मणस्य द्रष्टारः प्रवक्तारश्च ते खल्वितिहासपुराणस्य धर्मशास्त्रस्य चेति। विषयव्यवस्थानाच्च यथाविषयं प्रामाण्यम्= अन्यो मन्त्रब्राह्मणस्य विषयोऽन्यश्चेतिहासपुराणधर्मशास्त्रणामिति= यज्ञो मन्त्रब्राह्मणस्य. लोकवृत्तमितिहासपुराणसय. लोकव्यवहारव्यवस्थानं धर्मशास्त्रस्य विषयः, तत्रैकेन न सर्वं व्यवस्थाप्यते इति यथाविषयमेतानि प्रमाणानीन्द्रियादिवदिति ।। ६२ ।। न्या. सू. ।। ४ ।। १ ।। ६३ ।। यत्पुनरेतत्-- क्लेशानुबन्धस्याविच्छेदादिति-- सुषुप्तस्य स्वप्नादर्शने क्लेशाभावादपवर्गः ।। ६३ ।। यथा सुषुप्तस्य खलु स्वप्नादर्शने रागानुबन्धः सुखदुःखानुबन्धश्च विच्छिद्यते तथाऽपवर्गेपीति, एतच्च ब्रह्मविदो मुक्तस्यात्मनो रूपमुदाहरन्तीति ।। ६३ ।। न्या. सू. ।। ४ ।। १ ।। ६४ ।। यदपि प्रवृत्त्यनुबन्धादिति--- न प्रवृत्तिः प्रतिसंधानाय हीनक्लेशस्य ।। ६४ ।। प्रक्षीणेषु रागद्वेषामोहेषु प्रवृत्तिर्न प्रतिसंधानाय, प्रतिसंधिस्तु पूर्वजन्मनिवृत्तौ पुनर्जन्म तच्चाऽदृष्टकारितं तस्यां प्रहीणायां जन्मान्तराभावः= अप्रतिसंधानम्= अपवर्गः। कर्मवैफल्यप्रसङ्ग इतिचेत् ? न-- कर्मविपाकप्रतिसंवेदनस्याऽप्रत्याख्यानात्। पूर्वजन्मनिवृत्तौ पुनर्जन्म न

भवतीत्युच्यते न तु कर्मविपाकप्रतिसंवेदनं प्रत्याख्यायते, सर्वाणि पूर्वकर्माणि ह्यन्ते जन्मनि विपच्यन्ते इति ।। ६४ ।। न्या. सू. ।। ४ ।। १ ।। ६५ ।। न-- क्लेशसंततेः स्वाभाविकत्वात् ।। ६५ ।। नोपपद्यते क्लेशानुबन्धविच्छेदः, कस्मात् ?, क्लेशसंततेः स्वाभाविकत्वात्= अनादिरियं क्लेशसंततिः न चानादिः शक्य उच्छेत्तुमिति ।। ६५ ।। न्या. सू. ।। ४ ।। १ ।। ६६ ।। अत्र कश्चित् परीहारमाह--- प्रागुत्पत्तेरभावानित्यत्ववत् स्वाभाविकेप्यनित्यत्वम् ।। ६६ ।। यथाऽनादिः प्रागुत्पत्तेरभाव उत्पन्नेन भावेन निवर्त्यते एवं स्वाभाविकी क्लेशसंततिरनित्येति ।। ६६ ।। न्या. सू. ।। ४ ।। १ ।। ६७ ।। अणुश्यामताऽनित्यत्ववद्ध ।। ६७ ।। अपर आह-- यथाऽनादिरणुश्यामता अथ चाग्निसंयोगादनित्या तथा क्लेशसंततिरपीति ।। ६७ ।। सतः खलु धर्मो नित्यत्वमनित्यत्वं च तत्त्वं भावेऽभावे भाक्तमिति। 'अनादिरणुश्यामता' इति हेत्वभावादयुक्तम्। अनुत्पत्तिधर्मकमनित्यमिति नात्र हेतुरस्तीति। न्या. सू. ।। ४ ।। १ ।। ६८ ।। अयं तु समाधिः--- न-- संकल्पनिमित्तत्वाच्च रागादीनाम् ।। ६८ ।। 'कर्मनिमित्तत्वादितरेतरनिमित्तत्वाच्च' इति समुच्चयः, मिथ्यासंकल्पेभ्यो रञ्जनीयकोपनीयमोहनीयेभ्यो रागद्वेषमोहा उत्पद्यन्ते, कर्म च कत्त्वनिकायनिर्वर्तकं नैयमिकान् रागद्वेषमोहान् निर्वर्तयति-- नियमदर्शनात्= दृश्यते हि कश्चित्सत्त्वनिकायो रागबहुलः कश्चिद् द्वेषबहुलः कश्चिद् मोहबहुलः इति, इतरेतरनिमित्ता च रागादीनामुत्पत्तिः= मूढो रज्यति मूढः कुप्यति. रक्तो मुह्यति. कुपितो मुह्यति। सर्वमिथ्यासंकल्पानां तत्त्वज्ञानादनुत्पत्तिः कारणानुत्पत्तौ च कार्यानुत्पत्तेरिति रागादीनामत्यन्तमनुत्पत्तिरिति। 'अनादिश्च क्लेशसंततिः' इत्यऽयुक्तम्-- सर्वे इमे खल्वाध्यात्मिका भावा अनादिना प्रबन्धेन प्रवर्तन्ते शरीरादयो. न जात्वत्र कश्चिदनुत्पन्नपूर्वः प्रथमत उत्पद्यतेऽन्यत्र तत्त्वज्ञानात्। न चैवं सत्यऽनुत्पत्तिधर्मकं किंचिद् व्ययधर्मकं प्रतिज्ञायते इति।कर्म च सत्त्वनिकायनिर्वर्तकं तत्त्वज्ञानकृताद् मिथ्यासंकल्पविघातान्न रागाद्युत्पत्तिनिमित्तं भवति सुखदुःखसंवित्तिफलं तु भवतीति ।। ६८ ।। ।। इति वात्स्यायनविरचिते न्यायभाष्ये चतुर्थाध्यायस्य प्रथममाढिद्धठुड़१४;नकं समाप्तम् ।